Reg. No. : .....................................

Name : .......................................

**Code No. 7045**

**Second Year – June 2017**
**SAY/IMPROVEMENT**

Time : 2½ Hours
Cool-off time : 15 Minutes

Part – III

## SANSKRIT SAHITYA

Maximum : 80 Scores

***General Instructions to Candidates :***

- There is a 'cool-off time' of 15 minutes in addition to the writing time of 2½ hrs.
- You are not allowed to write your answers nor to discuss anything with others during the 'cool-off time'.
- Use the 'cool-off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- All questions are compulsory and only internal choice is allowed.
- When you select a question, all the sub-questions must be answered from the same question itself.
- Electronic devices except non-programmable calculators are not allowed in the Examination Hall.

**निर्देशा :**

1. सर्वे प्रश्ना: समाधेया ।
2. प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरं लिखत ?
3. प्रश्नानां वाचनाय 15 निमेषा: अधिकतया कल्पिता: ?

1. (1) कोष्ठकात् उचितम् उत्तरं निर्धार्य लिखत ।

गृहं प्रविष्टः स ददर्श वल्लभाम् । कः ?

(श्रीकृष्णः, कुचेलः, बलरामः) **(Score : 1)**

(2) श्रीमन्नारायणीयम् इति स्तोत्रकाव्यं तत्कर्तारं

च अधिकृत्य लघुटिप्पणीं लिखत । **(Scores : 5)**

2. (1) पाशाधराशाभिमुखः प्रतस्थे । कः ?

(वरुणः, श्रीकृष्णः, अर्जुनः) **(Score : 1)**

(2) अधः प्रदत्तं श्लोकं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि लिखत ।

राजद्वारि मृतं निधाय तनयं क्वास्ते निरस्तत्रपः

कृष्णः स्त्रीजनलम्पट ! क्व नु हली हालामदान्धाशयः ।

इत्युच्चैर्गिरमुद्गिरन् द्विजवरः क्षिप्रं प्रपेदे सभां

नीरन्ध्रान्धकवृष्णिवीरमकुटीरत्नाङ्कुरोद्यत्प्रभाम् ।।

(क) हली कः ? (श्रीकृष्णः, बलरामः, श्रीरामः) **(Score : 1)**

(ख) ब्राह्मणः कीदृशं पुत्रं संस्थाप्य सभां प्रपेदे ? **(Score : 1)**

(ग) अधोरेखाङ्कितयोः पदयोः एकस्य पदच्छेदं कुरुत । **(Score : 1)**

(घ) अस्य श्लोकस्य सारांशं लिखत । **(Scores : 2)**

3. (1) 'विद्वदौषधम्' इति प्रसिद्धं काव्यं किम् ?

(शिशुपालवधम्, किरातार्जुनीयम्, नैषधम्) **(Score : 1)**

(2) लक्ष्मीपदलाञ्छनः इति बहुमतिः कस्य अस्ति ? **(Score : 1)**

(3) सूचनानुसारं पञ्चमहाकाव्येषु बृहत्त्रयी इति विषये एकं निबन्धं लिखत । **(Scores : 8)**

**सूचना**ः – महाकाव्यम्, पञ्चमहाकाव्यानि, तत्कर्तारः, शिशुपालवधम्, किरातार्जुनीयम्, नैषधम्, एतेषां वैशिष्ट्यानि

(4) माघम् इति प्रसिद्धं महाकाव्यं किम् ?

(नैषधीयम्, कुमारसम्भवम्, शिशुपालवधम्) **(Score : 1)**

(5) अधोदत्तं श्लोकं स्ववाक्यैः विशदयत ।

तावद्भा भारवेर्भाति
यावन्माघस्य नोदयः ।
उदिते नैषधे काव्ये
क्व माघः क्व च भारविः ।। **(Scores : 5)**

4. (1) श्वेतकेतुः कः आसीत् ?

(गुरुः, शिष्यः, राजकुमारः) **(Score : 1)**

(2) अधोदत्ते श्वेतकेतोः गुरोः च भाषणे रिक्तस्थानानि पूरयतु ।

श्वेतकेतुः – गुरो नमस्ते, अहं प्रत्यागतवान् ।

गुरुः – आगच्छतु । __________ ?

श्वेतकेतुः – पठितव्यं मया न पठितमिति पितुः अभिप्रायः । तदेव मम प्रत्यागमनस्य कारणम् ।

गुरुः – वत्स, द्वावजौ आदाय ________ ।

श्वेतकेतुः – ताभ्यां किं कर्तव्यम् ?

गुरुः – यदा अजानां संख्या _______
तदा प्रत्यागच्छ । **(Scores : 3)**

(3) अधोलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य पुनर्लिखत ।

किमधीतवान् इति पिता अपृच्छत् । कुमारस्य वदनकमलं गर्वेण दीप्तमभवत् । गुरुदक्षिणां दत्वा स्वभवनं प्रतिन्यवर्तत । अधीतविद्यः सन् आगच्छतु इति अवदत् पुत्रम् अभिनन्दितुं पिता आबहिस्तोरणं जगाम । **(Scores : 5)**

5. मृच्छकटिके विदूषकस्य स्वभाव-निरूपणं कुरुत । **(Scores : 5)**

6. (1) नवभारतं नाम महाकाव्ये कस्य अनुभवः वर्णयति ?

(टागोर्महोदयस्य, गान्धीजीमहोदयस्य, नेहरूमहोदयस्य) **(Score : 1)**

(2) अधोदत्तस्य श्लोकस्य आस्वादनटीकां लिखत ।

मान्यभारतजनाः श्रृणुतेमां
वाचमन्यभुवि वृत्तिमुपेत्य ।
कृष्णवर्णविहितात्मविकारा –
स्तर्जिताः सितगणैरिति कष्टम् ।। **(Scores : 4)**

7. (1) गीताञ्जलिः नाम काव्यस्य कर्ता कः ?

(जवाहरलालनेहरू, रवीन्द्रनाथटागोरू, बालगङ्गाधरतिलकः) **(Score : 1)**

(2) अधोनिर्दिष्टस्य आशयस्य उचितं वाक्यं प्रदत्तेभ्यः चित्वा लिखत ।

आशयः – दारिद्र्यम् अपनेतुं मम साहाय्यं कुरु ।

पुरतो नयसे यत्र मनस्त्वम् ।

प्रतिबुध्येत पितर्मम राष्ट्रम् ।

प्रहर प्रहर निदाने मम हृदि दारिद्र्यस्येति । **(Score : 1)**

(3) अधोदत्तेषु भवतः इष्टतमः श्लोकः कः ?

कारणं किम् ?

यत्र विनिर्भयमुदयति हृदयं
यत्रोदात्तो मूर्धोदेति ।
यत्र प्रसरति परितो ज्ञानं
परमं स्वातन्त्र्यं विदधानम् ।।

सततविसृत्वरचिन्तनकर्मसु
पुरतो नयसे यत्र मनस्त्वम् ।
स्वातन्त्र्यस्य स्वर्गे तस्मिन्
प्रतिबुध्येत पितर्मम राष्ट्रम् ।।

यथा कदाचन कमपि न दीनं
जहामि नापि यथा ।
नमामि दृप्तां प्रभुतां च तथा
शक्तिं मम देहि ।। **(Scores : 4)**

8. (1) वरतन्तुशिष्यः कः ?

(रघुः, कौत्सः, रामः) **(Score : 1)**

(2) चैतन्यमिव उष्णरश्मेः । अत्र उष्णरश्मिः कः ?

(चन्द्रः, शनिः, सूर्यः) **(Score : 1)**

(3) यथोचितं योजयत ।

| | | |
|---|---|---|
| धनेश्वरः | – | वाणी |
| विश्वजित् | – | पर्वतः |
| विशांपतिः | – | कुबेरः |
| गौः | – | यागः |
| सुमेरुः | – | मनुजेश्वरः |

**(Scores : 5)**

(4) सूचनानुसारं दानस्य महत्वमधिकृत्य निबन्धम् एकं लिखत ।

**सूचना :** रघुवंशे कौत्सरघुसंवादः, गुरुदक्षिणार्थी कौत्सः रघुं प्रपेदे, तयोः कुशलप्रश्नः, कुबेरात् अर्थं निष्क्रष्टुं निर्धनः कौत्सः चकमे, आकाशात् सुवर्णवृष्टिः सम्पूर्णसुवर्णदानं च । **(Scores : 8)**

9. अधः प्रदत्तं गद्यभागं प्रादेशिकभाषायां परिवर्तयत ।

अस्ति सकलभुवनप्रख्यातकीर्तिः रूपातिशयितनलकूबरः श्वेतकेतुर्नाम दिव्यलोकनिवासी महामुनिः । तं च कदाचित् देवतार्चनकमलान्युद्धर्तुं मन्दाकिनीमवतरन्तं पुण्डरीकोपविष्टा देवी लक्ष्मीः ददर्श । तद्रूपमवलोकयन्त्यास्तस्याः मन्मथविकृतं मन आसीत् । **(Scores : 3)**

10. (1) ध्वनिपद्धतेः प्रवर्तकः कः ?

(वामनः, क्षेमेन्द्रः, आनन्दवर्धनः) **(Score : 1)**

(2) अधोदत्तासु पद्धतिषु एकं विशदयत ।

रीतिपद्धतिः

वक्रोक्तिपद्धतिः

अलङ्कारपद्धतिः **(Scores : 3)**

(3) यथोचितं योजयत ।

| क | | ख |
|---|---|---|
| औचित्यपद्धतिः | – | कुन्दकः |
| रसपद्धतिः | – | वामनः |
| वक्रोक्तिपद्धतिः | – | भामहः |
| अलङ्कारपद्धतिः | – | भरतमुनिः |
| रीतिपद्धतिः | – | क्षेमेन्द्रः |

**(Scores : 5)**

SECOND YEAR HIGHER SECONDARY EXAMINATION, ~~MARCH~~ SAY 2017.

Sanskrit Sahitya 7045

| Qn. No | Sub Qns | Answer Key/Value Points | Score | Total |
|---|---|---|---|---|
| 1. | 1. | कुचेलः इति उचितोत्तरलेखनाय एकोऽङ्कः। | 1 | 1 |
| | 2. | आशयपूर्णतया क्रमानुसारं च लिखितं चेत् पञ्चाङ्काः। | 5 | 5 |
| 2. | 1. | श्रीकृष्णः इति उचितोत्तरस्य कृते एकोऽङ्कः। | 1 | 1 |
| | 2. (क) | बलरामः इति उचितोत्तरलेखनाय एकोऽङ्कः। | 1 | 1 |
| | (ख) | मृतं पुत्रम् इति उचितोत्तरस्य एकोऽङ्कः। | 1 | 1 |
| | (ग) | क्व+आस्ते, इति+उच्चैः इति वा लेखने सति एकोऽङ्कः। | 1 | 1 |
| | (घ) | पूर्णतया सारांशस्य लेखनाय द्वौ अङ्कौ। | 2 | 2 |
| 3. | 1. | नैषधम् इति उचितोत्तरलेखनाय एकोऽङ्कः। | 1 | 1 |
| | 2. | भारवेः इति उचितोत्तरस्य कृते एकोऽङ्कः। | 1 | 1 |
| | 3. | सूचनानुसारं क्रमानुसारं च लिखितं चेत् पूर्णाङ्काः। | 8 | 8 |
| | 4. | शिशुपालवधम् इति उचितोत्तरलेखनाय एकोऽङ्कः। | 1 | 1 |
| | 5. | आशयपूर्णतया विशदीकरणाय पूर्णाङ्काः। | 5 | 5 |
| 4. | 1. | शिष्यः इति उचितोत्तरलेखनाय एकोऽङ्कः। | 1 | 1 |
| | 2. | रिक्तस्थानेषु उचितपदानां योजनं कृत्वा | | |

| Qn. No | Sub Qns | Answer Key/Value Points | Score | Total |
|---|---|---|---|---|
| | | लेखनाय पूर्णाङ्कः। | 3 | 3 |
| | 3. | कथाक्रमानुसारं संयोज्य लिखितं चेत् पूर्णाङ्कः। | 5 | 5 |
| 5. | | विदूषकस्य स्वभावनिरूपणाय पूर्णाङ्कः। | 5 | 5 |
| 6. | 1. | गान्धिजीमहोदयस्य इति उचितोत्तर-लेखनाय एकोऽङ्कः। | 1 | 1 |
| | 2. | आशयपूर्णतया आस्वादनटीकालेखनाय पूर्णाङ्कः। | 4 | 4 |
| 7. | 1. | रवीन्द्रनाथटागोर् इति उचितोत्तरलेख-नाय एकोऽङ्कः। | 1 | 1 |
| | 2. | प्रहर प्रहर निकाने मम हृदि दारिद्र्यस्येति इति लिखितं चेत् एकोऽङ्कः। | 1 | 1 |
| | 3. | इष्टतमश्लोकस्य चयनाय अङ्कद्वयम्। | 2 | } 4 |
| | | कारणलेखनाय अङ्कद्वयम्। | 2 | |
| 8. | 1. | कौत्सः इति उचितोत्तरलेखनाय एकोऽङ्कः। | 1 | 1 |
| | 2. | सूर्यः इति उचितोत्तरलेखनाय एकोऽङ्कः। | 1 | 1 |
| | 3. | यथोचितयोजनाय एकैकः अङ्कः। | | |

| Qn. No | Sub Qns | Answer Key/Value Points | Score | Total |
|---|---|---|---|---|
| | | धनेश्वरः – कुबेरः | 1 | |
| | | विश्वजित् – यागः | 1 | |
| | | विशांपतिः – मनुजेश्वरः | 1 | |
| | | गौः – वाणी | 1 | |
| | | सुमेरुः – पर्वतः | 1 | 5 |
| | 4. | सूचनानुसारं क्रमानुसारं च लेखनाय पूर्णाङ्काः। | 8 | 8 |
| 9. | | यथोचितपरिवर्तनाय प्रतिवाक्यम् एकैकः अङ्कः। | | |
| | | प्रथमवाक्यस्य एकः अङ्कः। | 1 | 3 |
| | | द्वितीयवाक्यस्य एकः अङ्कः। | 1 | |
| | | तृतीयवाक्यस्य एकोऽङ्कः। | 1 | |
| 10. | 1. | आनन्दवर्धनः इति उचितोत्तरस्य लेखनाय एकोऽङ्कः। | 1 | 1 |
| | 2. | पद्धतेः पद्धतिकारस्य च विशदीकरणाय पूर्णाङ्काः। | 3 | 3. |

| Qn. No | Sub Qns | Answer Key/Value Points | Score | Total |
|---|---|---|---|---|
| | 3. | यथोचितयोजनाय एकैकः अङ्कः । | | |
| | | औचित्यपद्धतिः - क्षेमेन्द्रः | 1 | |
| | | रसपद्धतिः - भरतमुनिः | 1 | |
| | | वक्रोक्तिपद्धतिः - कुन्तकः | 1 | |
| | | अलङ्कारपद्धतिः - भामहः | 1 | |
| | | रीतिपद्धतिः - वामनः | 1 | 5. |
| | | | | 80 |